स्तनि जटा० स्त्रियां ङीप् ।२वर्षपर्वतभेदे च शब्दचि०।

**कर्णिन्** त्रि० कर्ण-अस्त्यर्थे तुन्दा० इलच् वा इनि । वृद्धकर्णयुक्ते लम्बकर्णे लम्बकर्णमानन्तु विधानपारि० शङ्खलिखितावाहतुः। "हनुमूलादधः कर्णौ लम्बौ तु परिकीर्त्तितौ । कर्णौ तु द्व्यङ्गुलौ शस्ताविति शातातपोऽब्रवीत्" । "अङ्गहाराङ्गदकेयूरायाङ्कुशकुण्डलकर्णिने" भा० अनु० १४अ० । स्त्रियां ङीप् । सा सुश्रुतोक्ते २योनिरोगभेदे च सा च "विंशतिर्व्यापदो योनेर्निर्दिष्टा रोगसङ्ग्रहे" इत्युद्दिश्य "उदावर्त्ता तथा वन्ध्या—अथानन्दा तु या योनिः कर्णिनी चरणाद्वयम् । श्लैष्मिका सकफा ज्ञेया" इत्यादिना ता विभज्य "अर्णिन्यां कर्णिका योनौ श्लेष्मासृग्भ्यां तु जायते" इति लक्षिता । "वर्त्तिं प्रदद्यात् कर्णिन्यां शोधनद्रव्यसम्भृताम् । प्रस्रंसिनीं घृताभ्यक्तां क्षीरस्विन्नां प्रवेशयेत्" सुश्रु०। २कुटिलावयवयुक्ते वाणभेदे पु०।"करोति कर्णिनो यस्तु यस्तु खड्गादिकन्नरः । प्रयान्ति ते विशसने नरके भृशदारुणे" विष्णुपु० २अं० ६अ० । "कर्णिनो वाणविशेषान्" श्रीधरः। अत्र पक्षे तुन्दा० इलच् वा इलच् कर्णिलः, पक्षे ठन् कर्णिक, मतुप् मस्य वः, कर्णवत् द्व्यङ्गुलात् वृद्धकर्णे हनुभागादधोलम्बकर्णे त्रि०। मतुपि स्त्रियां ङीप् ।

**कर्णी** स्त्री कर्ण–इन् वा ङीप् । कर्णिशब्दार्थे वाणभेदे तस्मिन्परे "अतः कृकमिकंसकुम्भपात्रकुशाकर्णीषु" पा० अतःपर विसर्गस्य नित्यं सः । अयसा निर्मिता कर्णी अयस्कर्णीत्यादि । २मूलदेवमातरि स्त्री कर्णीसुतः ।

**कर्णीमत्** पु० कर्णिर्वाणविशेषाकारः फलेऽस्त्यस्य मतुप् । संज्ञायां दीर्घः । आरग्वधे (सोदाल) शब्दचि० ।

**कर्णीरथ** पु० कर्णः सामीप्येनास्त्यस्य कर्णी स्कन्धः तेन ई शोभा यस्य न समासान्तः कप् स चासौ रथो रथतुल्यं वाहनं कर्म्म० । स्कन्धवाह्ये याने (पालकी) इत्यादौ । शब्दचि० तु अन्या व्युत्पत्तिर्दर्शिता यथा। कर्णसाध्यक्रिया उपचारात् घर्षः कर्णोऽस्यास्ति इनि । कर्णी चासौ रथश्च । शब्दमात्रेण रथो न वस्तुतो रथः । यद्वा सामीप्यात् कर्णशब्देन स्कन्धो लक्ष्यते सोऽस्यास्ति वाहनत्वेन इनि कर्णी चासौ रथश्च । उभयत्र अन्येषामपीति पा० दीर्घः इति" । "कर्णीरथस्थां रघुवीरपत्नीम्" रघुः ।

**कर्णीसुत** पु० ६त० । मूलदेवे त्रिका० हारा० च । स च कंसासुरः इति शब्दकल्पद्रुमः तन्मूलं मृग्यं कंसस्य कर्णीसुतत्वकथनाभावात् कादं० टीकायामुक्तस्तेयशास्त्रप्रवर्त्तकमूलदेवस्यैव तन्नाम न तु उग्रसेनजस्य नाम । अतएव "कर्णीसुतकथेव सन्निहितविपुलाचला" काद० व्या० "कर्णीसुतः करटकः स्तेयशास्त्रप्रवर्त्तकः । तस्य ख्यातौ सखायौ द्वौ विपुलाचलसंज्ञकौ" टी० उक्तम् । "कर्णीसुतप्रहिते च पथि मतिमकरवम्" दशकु०।

**कर्णेचुरचुरा** स्त्री पात्रेसमिता० समासः । (काणफुसलान) कर्णेजपने । युक्तारोह्या० अस्याद्युदात्तता । एवं कर्णेटिरटिरा अपि तदर्थे तथा द्युदात्तता च । [शब्दर० ।

**कर्णेन्दु** पु० कर्णे इन्दुरिव । अर्द्धचन्द्राकृतिकर्णालङ्कारभेदे

**कर्णोपकर्णिका** स्त्री कर्णादुपकर्णोऽस्त्यस्याः ठन् अत इत्त्वम् । (कानाकानि) परम्परश्रवणरूपे प्रवादे "प्रागेव कर्णोपकर्णिकया सुतापवादक्षुभितहृदयः" पञ्चत० ।

**कर्णोर्ण** पु० कर्णे ऊर्णाधिकं लोम यस्य। मृगभेदे । "कर्णोर्णकपदम्बाश्वैर्निर्जुष्टं वृकनाभिभिः" भाग० ४,६,१५,

**कर्ण्य** त्रि० कर्णे भवः शरीरावयवत्वात् यत् । १कर्णभवे मलादौ । कर्ण–कर्मणि यत् २भेद्ये च ।

**कर्त्त** शैथिल्ये शिथिलीकरणे आरम्भसंयोगशिथिलतापादने अ० चु० सक० सेट् । कर्त्तयति ते मतान्तरे कर्त्तापयति ते अचकर्त्तत्–त कर्त्तयाम्–बभूव आस चकार चक्रे । कर्त्तयिता कर्त्यात् कर्त्तयिषीष्ट कर्त्तयिष्यति ते । कर्त्तनीयः कर्त्तयितव्यः । कर्त्तयिता कर्त्तितः । कर्त्तनं कर्त्तना । कर्त्तयितुम् कर्त्तयित्वा आकर्त्त्य । कर्म्मणि कर्त्त्यते अकर्त्ति अकर्त्तयिषाताम्–अकर्त्तिषाताम् कर्त्तिता–कर्त्तयिता कर्त्तयिष्यते कर्त्तिष्यते–"एवाहं सर्वं दुर्भूतं कर्त्तं कृत्या कृताकृतम्" अथ० १०,१, ३२ । "अपि कर्त्तमवर्त्तयोऽयज्यून्" ऋ० १,१२१,१२ ।

**कर्त्त** पु० कर्त्तयति शिथिलीकरोति कर्त्त–अच् । १कूपे "त्वाष्ट्रं कर्त्तादपपदो यजत्राः !" यजु० २२,५१, "कर्त्तात् कूपात्" वेददी०। कृत–भावे घञ् ।२भेदे च । "सभ्रूभङ्गनियस्य यतयो यमकर्त्तहेतिम्" भाग० २,७,४८, कृत–च्च । ३छेदके त्रि०। "वृकस्य कर्त्तादवपदो यजत्राः" ऋ० २,२०,६। "हे यजत्राः अवपदः आपदः कर्त्तात् कर्त्तुः" भा० ।

**कर्त्तन** न० कृत–भावे ल्युट् ।१छेदने । "गुल्मगुच्छक्षुपलताप्रतानौषधिवीरुधाम् । पूर्व्वस्मृतादर्द्धदण्डः स्थानेषूक्तेषु कर्त्तने" "स तिलोऽस्य बधः पुंसः स्त्रीणां नासादिकर्त्तनम्" याज्ञ० कर्त्त–ल्युट । २शिथिलीकरणे करणे ल्युट् । ३कर्त्तनसाधने त्रि० । स्त्रियां ङीप् कर्त्तनी । कृत–कर्त्तरि ल्यु । ४भेदकर्त्तरि त्रि०।